Homas
the spiritual way to success

K. Krishna Prasad Bhat
Website: http://homas.in
Email: homasonline@gmail.com
Mobil: 8000858858 /9940406777



अथ शुक्रमन्त्र उच्यते —

ब्रह्मा ऋषिः। विराट्छन्दः। शुक्रो देवता। ओं बीजम्। स्वाहा शक्तिः।

बीजेन वा मन्त्रपदैर्वा अङ्गानि। वस्त्रं मे देहि शुक्राय स्वाहा। इति मन्त्रः। अयुतं जपेत्। आज्येन सहस्रं हुनेत्। पुरश्चरणाहोमः। अङ्गेन्द्रवज्रादिभिरावरणपूजा॥ अथ प्रयोगः —

शुक्रास्ये शुक्रपुष्पैर्हुतभुजि गुणशस्सप्तशो वैकविंश-
द्वारं होतव्यमेषोप्यतिसितकुसुमालेपनो वामदोष्णा।
वासोरत्नानि कार्तस्वरमपि सततं साधकाय प्रयच्छन्
ध्येयो व्याख्यानमुद्राकलितपरकरस्त्वापणालिन्दसंस्थः॥

तत्र अलिन्दमिति वेदिका। अस्यार्थः — शुक्रास्ये शुक्रवारे शुक्रपुष्पैः रलयोरभेदात् शुक्लपुष्पैः त्रिभिस्त्रिभिः पुष्पैर्वा सप्तभिस्सप्तभिः पुष्पैर्वा एकविंशतिवारं हुनेत्। उक्तप्रकारेण ध्यात्वा। तस्माद्वासोरत्नानि प्रदास्यति॥ तत्र गुणशः एकविंशद्वारहोमो मालतीमल्लिकाजातिभिः। जातीजायपत्री ஜாதிபத்ரீ. सप्तशः एकविंशद्धोमः पङ्कजकुमुदकल्हारकुन्दमन्दारनन्द्यावर्तजवन्तिकाभिः। मिश्रहोमपक्षे द्विचत्वारिंशदाहुतिसंख्याः। अमिश्रहोमपक्षे दशाधिकद्विशतसंख्या आहुतयः। अमिश्रस्तु एकैकविधपुष्पहोमः॥